In the neuter gender the ending vowel is lengthened before the case-affix णि which is a substitute for जस् and शस् in S'auraseni (xii. 11). स्सिं is optionally substituted for the loc. sing. affix after the pronouns (xii. 26.). वअं is optionally substituted for the nom. plural form of अस्मद् (xii. 25).

The Potential form in S'auraseni ends in ए as भवे (xii. 29); we have also भवेय्यामि as regular form. स्सं is optionally substituted for the 1st person sing. affix of the Future, as भविस्सं; we have also भविस्सामि (xii. 21).

The absolutive in S'auraseni is formed by affixing इअ to the root; as भमिअ, हसिअ (xii. 9); but in the case of कृ and गम्, दुअ is affixed; as कदुअ, गदुअ (xii. 10).

इत्थी is substituted for स्त्री (xii. 22), अच्छरिअ for आश्चर्य (xii. 30), विअ for इव (xii. 24) and जेत्त for एत्र (xii. 23).

॥ श्रीगणेशाय नमः ॥

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः ।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥ १ ॥
वररुचिरचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥ २ ॥

Victory to Ganeśa who is filled with pleasure as he rubs his cheek with his trunk, while the corners of his eyes are closed as he listens to the sweet sounds of the bees, delighted with the juice flowing from his temples. By searching out the things which were to be explained in these Sūtras of Prakrit Grammar, composed by Vararuchi, Bhāmaha, having understood their meaning, wrote a clear but concise commentary.

॥ आदेरतः ॥ १ ॥

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्याम आदेरतः स्थाने तद्भवतीत्येवं वेदितव्यम् । आदेरित्येतद् आ परिच्छेदसमाप्तेः । अत इति च आ अकारविधानात् । अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम् ॥

This sūtra is supposed to exercise an authority (अधिकार), by virtue of which it is implied in the succeeding sūtras. The various rules which we shall go through in order, are to be understood as supplying substitutes 'for the first अ'. 'For the first' is implied in all the sūtras to the end of the section ; 'अ' is implied until it is itself enjoined as a substitute for another vowel (*i. e.*, upto sūtra 9). The 'त्' in 'अत्' is used to exclude the homogeneous vowel (compare Pāṇini, I. i. 70).

॥ आ समृद्ध्यादिषु वा ॥ २ ॥

समृद्धि इत्येवमादिषु शब्देष्वादेरकारस्य आकारो भवति वा। समिद्धी*सामिद्धी। पअडं पाअडं। अहिजाई आहिजाई। मणंसिणी माणंसिणी। पडिवआ पाडिवआ। सरिच्छं सारिच्छं। पडिसिद्धी पाडिसिद्धी। पसुत्तं पासुत्तं। पसिद्धी पासिद्धी। अस्सो आसो ॥ समृद्धि। प्रकट। अभिजाति। मनस्विनी। प्रतिपत्। सदृक्ष। प्रतिस्पर्द्धिन्। प्रसुप्त। प्रसिद्धि। अश्व ॥ आकृतिगणोऽयम् ॥

In the words 'समृद्धि' etc., आ is optionally used for the first अ......This is a class of words which can only be determined by observing forms used in classical authors.

॥ इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु ॥ ३ ॥

ईषदादिषु शब्देषु आदेरतः स्थाने इकारादेशो भवति। वेति निवृत्तम् ॥ इसि। पिक्कं। सिविणो। वेडिसो। विअणो। मुइंगो। इंगालो ॥

In the words ईषत्, etc., इ is substituted for the first अ. The 'optionally' of the former rule does not apply to this...........

॥ लोपोऽरण्ये ॥ ४ ॥

अरण्यशब्दे आदेरतो लोपो भवति ॥ रण्णं ॥

In the word अरण्य, a forest, the first अ is elided...

॥ ए शय्यादिषु ॥ ५ ॥

शय्या इत्येवमादिषु शब्देषु आदेरत एकारादेशो भवति ॥ सेज्जा। सुंदेरं। उक्केरो। तेरहो। अच्छेरं। पेरन्तं। वेल्ली ॥ शय्या। सौन्दर्य। उत्कर। त्रयोदश। आश्चर्य। पर्यन्त। वल्लि ॥

In the words शय्या etc., ए is substituted for the first अ...

---

* The Sanskrit equivalent of these words are given at the end of the para and hence are not repeated in the translation. Such omission in indicated by dots.

॥ ओ बदरे देन ॥ ६ ॥

बदरशब्दे दकारेण सहादेरत ओत्वं भवति ॥ बोरं ॥

In the word बदर, the *jujub*, the first अ with the letter द becomes ओ...

॥ लवणनवमल्लिकयोर्वेन ॥ ७ ॥

लवणनवमल्लिकयोरादेरतो वकारेण सह ओकारः स्यात् ॥ लोणं ॥ णोमाल्लिआ ॥

In the two words लवण, salt and नवमल्लिका, double jasmine, the first अ with the following व becomes ओ...

॥ मयूरमयूखयोर्य्वा वा ॥ ८ ॥

मयूर मयूख इत्येतयोर्यूशब्देन सहादेरत ओत्वं वा भवति ॥ मोरो मऊरो । मोहो मऊहो ॥

In the two words मयूर, a peacock, and मयूख, a ray, the first अ with the syllable यू becomes optionally ओ...

॥ चतुर्थीचतुर्दश्योस्तुना ॥ ९ ॥

एतयोस्तुना सहादेरत ओत्वं भवति वा ॥ चोत्थी चउत्थी । चोद्दही चउद्दही ॥

In the two words चतुर्थी and चतुर्दशी, the fourth and fourteenth lunations, the first अ with the syllable तु optionally becomes ओ...

॥ अदातो यथादिषु वा ॥ १० ॥

अत इति निवृत्तं स्थान्यन्तरनिर्देशात् । यथा इत्येवमादिष्वातः स्थाने अकारादेशो भवति वा । जह जहा । तह तहा । पत्थरो पत्थारो । पउअं पाउअं । तलवेण्टअं तालवेण्टअं । उक्खअं उक्खाअं । चमरं चामरं । पहरो पहारो । चडु चाडु । दवग्गी दावग्गी । खइअं खाइअं । संठविअं संठाविअं । हलिओ हालिओ ॥ यथा । तथा । प्रस्तार । प्राकृत ।

तालवृन्तक। उत्खात। चामर। प्रहार। चाटु। दावाग्नि। खादित। संस्थापित। हालिक॥

अ is no longer implied (see sūtra 1 above), in consequence of the change of स्थानिन्, the primitive element. In the words यथा etc., अ is optionally substituted for आ...

॥ इत्सदादिषु ॥ ११ ॥

सदा इत्येवमादिषु आत इकारो भवति वा ॥ सइ सआ। तइ तआ। जइ जआ॥ सदा। तदा। यदा।

In words सदा etc., इ is optionally substituted for आ...

॥ इत एत्पिण्डसमेषु ॥ १२ ॥

पिण्ड इत्येवंसमेषु इकारस्य एकारादेशो भवति वा। पेण्डं पिण्डं। णेद्दा णिद्दा। सेंदूरं सिंदूरं। धम्मेल्लं धम्मिल्लं। चेंधं चिंधं। वेण्हू विण्हू। पेट्ठं पिट्ठं॥ पिण्ड। निद्रा। सिन्दूर। धम्मिल्ल। चिह्न। विष्णु। पिष्ट॥ समग्रहणं संयोगपरस्योपलक्षणार्थम्॥

In words like पिण्ड, ए is optionally substituted for इ. ......The word सम is used to indicate that the rule applies only when इ is followed by a conjunct consonant (as in पिण्ड).

॥ अत्पथिहरिद्रापृथिवीषु ॥ १३ ॥

पथ्यादिषु शब्देष्विकारस्य आकारो भवति॥ पहो। हलद्दा। पुहवी॥

In पथिन etc., अ is substituted for इ...

॥ इतेस्तः पदादेः ॥ १४ ॥

पदादेरितिशब्दस्य यस्तकारस्तस्मात्परस्य इकारस्य अकारो भवति॥ इअ *उअह अण्णहुत्तअणं। इअ विअसंतीउ चिरं॥ इति पश्यतान्यथावचनम्॥ इति विकसन्त्यश्चिरम्॥ पदादेरिति वचनादिह न भवति॥ पिओत्ति प्रिय इति॥

* 'So behold the hypocrisy or falsehood;' 'thus blossoming for a long time'.

In the word इति when at the beginning of the sentence अ is substituted for इ which follows त...... We infer, from its being restricted to the beginning of a sentence, that the rule does not hold in such a case as पिओ त्ति, प्रिय इति.

॥ उदिक्षुवृश्चिकयोः ॥ १५ ॥

इक्षुवृश्चिकयोरित उत्वं भवति । उच्छू । विञ्छुओ ॥

In the two words इक्षु, the sugarcane, and वृश्चिक, the scorpion, उ is substituted for इ...

॥ ओ च द्विधाकृञः ॥ १६ ॥

कृञ्धातुप्रयोगे द्विधाशब्दस्यौकारो भवति । चकारादुत्वं च ॥ द्विधाकृतम् । दोहाइअं । दुहाइअं ॥ द्विधा क्रियते । दोहाइज्जइ । दुहाइज्जइ ॥

ओ is substitutued in the word द्विधा, when used with the root कृञ्, and उ also, since we find च in the sūtra...

॥ ईत्सिंहजिह्वयोश्च ॥ १७ ॥

एतयोरादेरिकारस्य ईकारो भवति ॥ सीहो । जीहा ॥ चकारोऽनुक्तसमुच्चयार्थः । तेन वीसत्थ वीसम्भ इत्येवमादिषु ईत्वं भवति ॥

In सिंह, a lion, and जिह्वा, the long ई is substituted for इ...... The च mentioned in the sūtra is meant to include other words like वीसत्थ, वीसंभ wherein ई is substituted for इ in विश्रम्भ, विश्रब्ध.

इदीतः पानीयादिषु ॥ १८ ॥

पानीय इत्येवमादिष्वादेरीकारस्य इकारो भवति ॥ पाणिअं । अलिअं । वलिअं । तआणिं । करिसो । दुइअं । तइअं । गहिरं ॥ पानीय । अलीक । व्यलीक । तदानीम् । करीष । द्वितीय । तृतीय । गभीर ॥

In पानीय etc. इ is substituted for the first ई...

॥ एन्नीडापीडकीदृगीदृशेषु ॥ १९ ॥

नीडादिषु ईकारस्य एकारो भवति ॥ णेड्डं । आमेलो । केरिसो । एरिसो ॥

In नीड etc. ए is substituted for ई...

॥ उत ओत्तुण्डरूपेषु ॥ २० ॥

तुण्ड इत्येवंरूपेषु आदेरुकारस्य ओकारो भवति ॥ तोंडं । मोत्ता । पोक्खरो । पोत्थओ । लोद्धओ । कोट्टिमं ॥ तुण्ड । मुक्ता । पुष्कर । पुस्तक । लुब्धक । कुट्टिम ॥ रूपग्रहणं संयोगपरोलक्षणार्थम् ॥

In words like तुण्ड, ओ is substituted for उ...The word रूप in the sūtra is used to indicate that the उ must be followed by a conjunct constonant (as in तुण्ड).

॥ उलूखले ल्वा वा ॥ २१ ॥

उलूखलशब्दे लूशब्देन सह उकारस्य ओकारो भवति वा ॥ ओक्खलं । उलूहलं ।

In उलूखल, a mortar, उ with the syllable लू optionally becomes ओ...

॥ अन्मुकुटादिषु ॥ २२ ॥

मुकुट इत्येवमादिष्वादेरुकारस्य स्थाने अकारो भवति ॥ मउडं । मउलं । गरुअं । गरुई । जहिट्ठिलो । सोअमल्लं । अवरि ॥ मुकुट । मुकुल । गुरु । गर्वी । युधिष्ठिर । सौकुमार्य । उपरि ॥

In मुकुट etc., अ is substituted for the first उ...

॥ इत्पुरुषे रोः ॥ २३ ॥

पुरुषशब्दे यो रेफस्तस्य उकारस्य इकारो भवति ॥ पुरिसो ॥

In the word पुरुष, a man, इ is substituted for उ which follows र...

॥ उदूतो मधूके ॥ २४ ॥

मधूकशब्दे ऊकारस्य उकारो भवति । महुअं ॥

In the word मधूक, Bassia latifolia, उ is substituted for ऊ...

॥ अद्दुकूले वा लस्य द्वित्वम् ॥ २५ ॥

दुकूलशब्दे ऊकारस्य अकारो भवति वा । तत्संयोगेन लकारस्य द्वित्वम् ॥ दुअल्लं दुऊलं ॥

In the word दुकूल, woven silk, अ is optionally substituted for ऊ, and when it is so substituted, the ल is doubled...

॥ एन्नूपुरे ॥ २६ ॥

नूपुरशब्दे ऊकारस्य एकारो भवति ॥ णेउरं ॥

In the word नूपुर, an anklet, ए is substituted for ऊ...

॥ ऋतोऽत् ॥ २७ ॥

आदेर्ऋकारस्य अकारो भवति ॥ तणं । घणा । मअं । कअं । वद्धो । वसहो ॥ तृण । घृणा । मृत । कृत । वृद्ध । वृषभ ॥

अ is substituted for ऋ in the first syllable of a word...

इदृष्यादिषु ॥ २८ ॥

ऋष्यादिषु शब्देषु आदेर्ऋकारस्य इकारो भवति ॥ इसी । विसी । गिट्ठी । दिट्ठी । सिट्ठी । सिंगारो । मिअंको । भिंगो । भिंगारो । हिअअं । विइण्हो । विंहिअं । किसरो । किच्चा । विछुओ । सिआलो । किई । किसी । किवा ॥ ऋषि । वृषी । गृष्टि । दृष्टि । सृष्टि । शृंगार । मृगांक । भृंग । भृंगार । हृदय । वितृष्ण । बृंहित । कृशर । कृत्या । वृश्चिक । शृगाल । कृति । कृपि । कृपा ॥

In ऋषि etc., इ is substituted for the initial ऋ...

॥ उदृत्वादिषु ॥ २९ ॥

ऋतु इत्येवमादिषु आदेर्ऋत उकारो भवति। उदू। मुणालो। पुहवी। वुंदावणं। पाउसो। पउत्ती। विउदं। संवुदं। णिव्वुदं। वुत्तंतो। परभुओ। माउओ। जामाउओ॥ ऋतु। मृणाल। पृथिवी। वृंदावन। प्रावृष्। प्रवृत्ति। विवृत। संवृत। निर्वृत। वृत्तान्त। परभृत। मातृक। जामातृक। इत्येवमादयः॥

In ऋतु etc., उ is substituted for the initial ऋ...

॥ अयुक्तस्य रिः ॥ ३० ॥

वर्णान्तरेणायुक्तस्यादेर्ऋकारस्य रिकारो भवति॥ रिणं। रिद्धो। रिच्छो॥

The syllable रि is substituted for the vowel ऋ when initial and not connected with another letter...

॥ क्वचिद्युक्तस्यापि ॥ ३१ ॥

वर्णान्तरेण युक्तस्यापि क्वचिदृकारस्य रिकारो भवति॥ एरिसो। सरिसो। तारिसो॥

The syllable रि is sometimes substituted for an initial ऋ, even when it is connected with another letter.

॥ वृक्षे वेन रुर्वा ॥ ३२ ॥

वृक्षशब्दे वशब्देन सह ऋकारस्य रुकारो भवति वा॥ रुक्खो। वच्छो॥ व्यवस्थितविभाषाज्ञापनात् छत्वपक्षे न भवति खत्वपक्षे तु नित्यमेव भवति॥

In the word वृक्ष, a tree, the syllable रु is optionally substituted for the initial ऋ with its accompanying व...... The option being here definitly restricted, the change does not take place at all in the case of the substitution of छ for क्ष, but it holds universally in that of ख (see iii. 31.).

लृतः क्लृप्त इलिः ॥ ३३ ॥

क्लृप्तशब्दे ऋकारस्य इलीत्ययमादेशो भवति॥ किलित्तं ॥ तदेव-मादेशान्तरविधानात् प्राकृते ऋकारलृकारौ न भवतः ॥

In the word क्लृप्त, made,, इलि is substituted for लृ...From the above substitution being enjoined, we infer that the vowels ऋ and लृ do not exist in Prakrit.

एत इद्वेदनादेवरयोः ॥ ३४ ॥

वेदनादेवरयोरेकारस्य इकारो भवति ॥ विअणा । दिअरो ॥ वाग्रहणानुवृत्तेः क्वचिन् वेअणा । देअरो । इत्यपि ॥

In words वेदना, pain and देवर, a brother-in-law, इ is substituted for ए...Since "optionally" is still implied (from sūtra 32), the forms वेअणा and देअर are also sometimes used.

॥ एत एत् ॥ ३५ ॥

आदेरैकारस्य एकारो भवति॥ सेलो। सेच्चं। एरावणो। केलासो। तेल्लोक्कं॥ शैल। शैत्य। ऐरावत। कैलास। त्रैलोक्य॥

For the first ऐ in a word, ए is substituted...

॥ दैत्यादिष्वइ ॥ ३६ ॥

दैत्यादिषु शब्देषु ऐकारस्य अइ इत्ययमादेशो भवति ॥ दइच्चो। चइत्तो। भइरवो। सइरं। वइरं। वइदेसो। वइदेहो। कइअवो। वइसाहो। वइसिओ। वइसंपाअणो॥ दैत्य। चैत्र। भैरव। स्वैर। वैर। वैदेश। वैदेह। कैतव। वैशाख। वैशिक। वैशम्पायन। इत्यादयः॥

In the words दैत्य etc., अइ is substituted for the diphthong ऐ...

॥ दैवे वा ॥ ३७ ॥

दैवशब्दे ऐकारस्य अइ इत्ययमादेशो भवति वा ॥ दइवं। देव्वं ॥ अनादेशपक्षे नीडादित्वाद् द्वित्वम ॥

In the word दैव fate, अइ is optionally substituted for the diphthong ऐ...... In the case of its non-substitution, the व is doubled by the rule iii. 52.

॥ इत्सैन्धवे ॥ ३८ ॥

सैन्धवशब्दे ऐकारस्य इकारो भवति ॥ सिंधवं ॥

In the word सैन्धव, produced in Sind, इ is substituted for ऐ...

॥ ईद्धैर्ये ॥ ३९ ॥

धैर्यशब्दे ऐकारस्य ईकारो भवति ॥ धीरं ॥

In the word धैर्य, firmness, ई is substituted for ऐ...

॥ ओतोऽद्वा प्रकोष्ठे कस्य वः ॥ ४० ॥

प्रकोष्ठशब्दे ओकारस्य अकारो भवति वा। तत्संयोगेन च ककारस्य वत्वम् ॥ पवट्ठो पओट्ठो ॥

In the word प्रकोष्ठ, the fore-arm, अ is optionally substituted for ओ, and when it is so substituted, the क becomes व...

॥ औत ओत् ॥ ४१ ॥

औकारस्य आदेरोकारो भवति ॥ कोमुई । जोव्वणं । कोत्थुहो । कोसंबी ॥ कौमुदी । यौवनं । कौस्तुभ । कौशाम्बी ॥

ओ is substituted for the first औ...

॥ पौरादिष्वउ ॥ ४२ ॥

पौर इत्येवमादिषु शब्देषु औकारस्य अउ इत्ययमादेशो भवति ॥ पउरो । कउरओ । पउरिसो । पौर ॥ कौरव । पौरुष । आकृतिगणोऽयम ॥ कौशले विकल्पः ॥ कोसलो । कउसलो ॥ कौशल ॥

In पौर etc., अउ is substituted for औ...... These form a class of words which can only be determined by observing the form used in classical works. In the word कौशल, welfare, the change is optional...

॥ आच्च गौरवे ॥ ४३ ॥

गौरवशब्दे औकारस्य आकारो भवति ॥ चकारादउत्वं च ॥ गारवं । गउरवं ॥

In the word गौरव, greatness, आ is substituted for औ and so also अउ as we find the word च in the sūtra...

॥ उत्सौन्दर्यादिषु ॥ ४४ ॥

सौन्दर्य इत्येवमादिषु औकारस्य उकारो भवति ॥ सुंदेरं । मुंजाअणो । सुंडो । कुक्खेअओ । दुव्वारिओ ॥ सौन्दर्य । मौञ्जायन । शौण्ड । कौक्षेयक । दौवारिक ॥

In सौन्दर्य etc., उ is substituted for औ.........

॥ इति वररुचिकृते प्राकृतप्रकाशे अज्विधिर्नाम प्रथमः परिच्छेदः ॥

॥ अथ द्वितीयः परिच्छेदः ॥

॥ अयुक्तस्यानादौ ॥ १ ॥

अधिकारोऽयम् । इत उत्तरं यद्वक्ष्यामस्तदयुक्तस्य व्यंजनस्यानादौ वर्तमानस्य कार्यं भवतीत्येवं वेदितव्यम् । वक्ष्यति कादीनां लोपः ॥ मउडं ॥ अयुक्तस्येति किम् । अग्घो । अक्को ॥ अनादाविति किम् । कमलं ॥ अयुक्तस्येति आ परिच्छेदसमाप्तेः ॥ अनादाविति च आ जकारविधानात् ॥

This being an अधिकारसूत्र, will be implied in the succeeding sūtras. The rules which we shall enjoin from this point, are to be understood as applying in the case of a single non-initial consonant. The elision of क etc., (by sūtra 2) will serve for an instance, as मउडं for Sanskrit मुकुट. Why do we say a single consonant ? Compare अग्घो and अक्को for Sk. अर्घ and अर्क (where we find a conjunct consonant and therefore no elision). Why non-initial ?

Compare कमलं where initial क is not elided. 'Single' is implied to the end of the section; 'non-initial' until ज is enjoined in sūtra 31.

कगचजतदपयवां प्रायो लोपः ॥ २ ॥

कादीनां नवानां वर्णानामयुक्तानामनादौ वर्तमानानां प्रायो बाहुल्येन लोपो भवति ॥ कस्य तावत् । मउलो । णउलं ॥ गस्य । साअरो ॥ णअरं ॥ चस्य । वअणं । सूई ॥ जस्य । गओ । रअदं ॥ तस्य । कअं । विआणं ॥ दस्य । गआ । मओ ॥ पस्य । कई । विउलं । सुउरिसो ॥ सुपुरुष इति यद्यपि उत्तरपदस्य पुरुषशब्दस्यादिस्तथापि लोपो भवतीत्यनेन ज्ञापयति वृत्तिकारः यथा उत्तरपदादिरनादिरेवेति ॥ यस्य। वाउणा। णअणं।। वस्य। जीअं। दिअहो।। मुकुल। नकुल। सागर। नगर। वचन। सूची। गज। रजत। कृत। वितान। गदा। मद। कपि। विपुल। सुपुरुष। वायुना। नयन। जीव। दिवस ॥

These nine consonants क, ग, च, ज, त, द, प, य, and व when single and non-initial, are generally elided.........In the word सुपुरुष, although the प is the initial of the word पुरुष, the last member of the compound, it is still elided. The author of the commentary thereby wants to show that 'the initial letter of the second or last member of a compound is considered as non-initial.........

प्रायोग्रहणाद्यत्र श्रुतिसुखमस्ति तत्र न भवत्येव ॥ सुकुसुमं । पिअगमणं। सचावं। अवजलं। अतुलं। आदरो। अपारो। अजसो। सबहुमाणं ॥ सुकुसुम। प्रियगमन। सचाप। अपजल। अतुल। आदर। अपार। अयशस्। सबहुमान ॥

अयुक्तस्येत्येव ॥ सक्को । मग्गो ॥ शक्र । मार्ग ॥

अनादावित्येव ॥ कालो । गंधो ॥ काल । गंध ॥

From the use of प्रायः in the sūtra we conclude that there is no elision when euphony is satisfied as in सुकुसुम

etc.,......The elision takes place only if the letters are not conjunct consonats; compare सक्को and मग्गो where there is no elision. It also takes place if these letters are non-initial; compare काल and गन्ध where क and ग are not elided.

॥ यमुनायां मस्य ॥ ३ ॥

यमुनाशब्दे मकारस्य लोपो भवति ॥ जउणा ॥

In the word यमुना, म् is elided.........

॥ स्फटिकनिकषचिकुरेषु कस्य हः ॥ ४ ॥

अनादाविति वर्तते । एषु कस्य हकारो भवति । लोपापवादः ॥ फलिहो । णिहसो । चिहुरो ॥

'Non-initial' continues to be implied. In the three words स्फटिक etc., ह is substituted for क...

॥ शीकरे भः ॥ ५ ॥

शीकरशब्दे ककारस्य भकारो भवति ॥ सीभरो ॥

In the word शीकर, spray, क is changed to भ...

॥ चन्द्रिकायां मः ॥ ६ ॥

चन्द्रिकाशब्दे ककारस्य मकारो भवति ॥ चंदिमा ॥

In the word चन्द्रिका, क is changed to म... ...

॥ ऋत्वादिषु तो दः ॥ ७ ॥

ऋतु इत्येवमादिषु तकारस्य दकारो भवति ॥ उदू । रअदं । आअदो । णिव्वुदी । आउदी । संवुदी । सुइदी । आइदी । हदो । संजदो । विउदं । संजादो । संपदि । पडिवद्दी ॥ ऋतु । रजत । आगत । निर्वृति । आवृति । संवृति । सुकृति ।आकृति । हत । संयत । विवृत संयात । संप्रति । प्रतिपत्ति ॥

In words ऋतु etc., द is substituted for त.........

॥ प्रतिसरवेतसपताकासु डः ॥ ८ ॥

एषु शब्देषु तकारस्य डकारो भवति । लोपापवादः ॥ पडिसरो । वेडिसो । पडाआ ॥

In words प्रतिसर etc., त is changed to ड. This is thus an exception to sūtra 2 above which enjoins elision......

॥ वसतिभरतयोर्हः ॥ ९ ॥

वसतिभरतशब्दयोस्तकारस्य हकारो भवति ॥ वसही । भरहो॥

In words वसति and भरत, त is changed to ह......

॥ गर्भिते णः ॥ १० ॥

गर्भितशब्दे तकारस्य णकारो भवति ॥ गब्भिणं ॥

In the word गर्भित, त is changed to ण......

॥ ऐरावते च ॥ ११ ॥

ऐरावतशब्दे तकारस्य णकारो भवति । एरावणो ॥

In the word ऐरावत, त is changed to ण......

॥ प्रदीप्तकदम्बदोहदेषु दो लः ॥ १२ ॥

एषु शब्देषु दकारस्य लकारो भवति ॥ पलित्तं । कलंबो । दोहलो ॥

In words प्रदीप्त etc., ल is substituted for द......

॥ गद्गदे रः ॥ १३ ॥

गद्गदशब्दे दकारस्य रेफादेशो भवति ॥ गग्गरो ॥

In the word गद्गद, र is substituted for द......

॥ संख्यायां च ॥ १४ ॥

संख्यावाचिनि शब्दे यो दकारस्तस्य रेफादेशो भवति ॥ एआरह। वारह । तेरह ॥ एकादश । द्वादश । त्रयोदश ॥ अयुक्तस्येत्येव । चउद्दह॥

In words expressive of number, र is substituted for द... ......This change takes place only if the द is a non-conjunct; so that the rule will not apply to चउद्दह for चतुर्दश where द is not a single consonant.

पो वः ॥ १५ ॥

पकारस्यायुक्तस्यानादिवर्तिनो वकारादेशो भवति ॥ सावो । सवहो । उलवो । उवसग्गो ॥ शाप । शपथ । उलप । उपसर्ग ॥ प्रायोग्रहणाद्यत्र लोपो न भवति तत्रायं विधिः ॥

व is substituted for a single non-initial प...... From the use of प्रायः (implied from sūtra 2) we infer that this rule applies wherever there is no elision.

॥ आपीडे मः ॥ १६ ॥

आपीडशब्दे पकारस्य मकारो भवति ॥ आमेलो ॥

In the word आपीड, a chaplet, म is substituted for प......

॥ उत्तरीयानीययोर्ज्जो वा ॥ १७ ॥

उत्तरीयशब्दे अनीयप्रत्ययान्ते च यस्य ज्जो भवति वा ॥ उत्तरीअं । उत्तरिज्जं । रमणीअं । रमणिज्जं । भरणीअं । भरणिज्जं ॥

In the word उत्तरीय and in words ending with the affix अनीय, ज्ज is substituted for य......

॥ छायायां हः ॥ १८ ॥

छायाशब्दे यकारस्य हकारो भवति ॥ छाहा ॥

In the word छाया, a shadow, ह is substituted for य......

॥ कबन्धे वो मः ॥ १९ ॥

कबन्धशब्दे बकारस्य मकारो भवति ॥ कमंधो ॥

In the word कबन्ध, a headless trunk, म is substituted for ब......

॥ टो डः ॥ २० ॥

टस्यानादिवर्तिनो डकारो भवति ॥ गडो । विडवो ॥

ड is substituted for non-initial ट......

॥ सटाशकटकैटभेषु ढः ॥ २१ ॥

एतेषु टकारस्य ढकारो भवति ॥ सढा । सअढो । केढवो ॥

In the words सटा, clotted hair, etc., ढ is substituted for ट......

॥ स्फटिके लः ॥ २२ ॥

स्फटिकशब्दे टकारस्य लकारो भवति ॥ फलिहो ॥

In the word स्फटिक crystal, ल is substituted for ट......

॥ डस्य च ॥ २३ ॥

डकारस्यायुक्तस्यानादिभूतस्य लकारो भवति ॥ दालिमं । तलाअं । वलही ॥ प्राय इत्येव ॥ दाडिमं । वडिसं । णिविडो ॥

ल is substituted for a single non-initial ड...Since प्रायः is implied from sūtra 2, we infer that such forms as दाडिमं etc., are also admissible.

॥ ठो ढः ॥ २४ ॥

ठकारस्यायुक्तस्यानादिभूतस्य ढकारो भवति ॥ मढं । जढरं । कढोरं ॥

ढ is substituted for a single non-initial ठ......

॥ अंकोठे ल्लः ॥ २५ ॥

अंकोठशब्दे ठकारस्य ल्लकारो भवति ॥ अंकोल्लो ॥

In the word अंकोठ, a plant, ल्ल is substituted for ठ...

॥ फो भः ॥ २६ ॥

फकारस्यायुक्तस्यानादिभूतस्य भकारो भवति ॥ सिभा । सेभालिआ । सभरी । सभलं ॥

भ is substituted for a single non-initial फ......

॥ खघथधभां हः ॥ २७ ॥

खादीनां पञ्चानामयुक्तानामनादिवर्तिनां हकारो भवति ॥ खस्य तावत् ॥ मुहं । मेहला ॥ घस्य ॥ मेहो । जहणो ॥ थस्य ॥ गाहा । सवहो ॥ धस्य ॥ राहा । वहिरो ॥ भस्य ॥ सहा । रासहो ॥ प्राय इत्येव ॥ पखलो । पलंघणो । अधीरो । अधणो । उवलद्धभावो ॥ मुख । मेखला । मेघ । जघन । गाथा । शपथ । राधा । वधिर । सभा । रासभ । प्रखल । प्रलंघन । अधीर । अधन । उपलब्धभाव ॥

ह is substituted for the five consonants ख, घ, थ, ध and भ, when single and non-initial......

प्राय: being still implied, we also find such forms as पखलो etc.

॥ प्रथमशिथिलनिषधेषु ढः ॥ २८ ॥

एतेषु थधयोर्ढकारो भवति ॥ पढमो । सिढिलो । णिसढो ॥

In the words प्रथम etc., ढ is substituted for थ and ध .....

॥ कैटभे वः ॥ २९ ॥

कैटभशब्दे भकारस्य वकारो भवति ॥ केढवो ॥

In the word कैटभ, व is substituted for भ......

॥ हरिद्रादीनां रो लः ॥ ३० ॥

हरिद्रा इत्येवमादीनां रेफस्य लकारो भवति ॥ हलद्दा । चलणो । मुहलो । जाहिट्ठिलो । सोमालो । कलुणं । अंगुली । इंगालो । चिलादो । फलिहा । फलिहो ॥ हरिद्रा । चरण । मुखर । युधिष्ठिर । सुकुमार । करुण । अंगुरी । अंगार । किरात । परिखा । परिघ । इत्येवमादयः ॥

In हरिद्रा etc., ल is substituted for र......

॥ आदेर्यो जः ॥ ३१ ॥

अनादेरिति निवृत्तम् ॥ आदिभूतस्य यकारस्य जकारो भवति ॥ जट्ठी । जसो । जक्खो ॥ यष्टि । यशस् । यक्ष ॥

The अधिकार of अनादेः, non-initial, which was implied from sūtra I ends here. ज is substituted for an initial य...

॥ यष्ट्यां लः ॥ ३२ ॥

यष्टिशब्दे यकारस्य लकारो भवति ॥ लट्ठी ॥

In the word यष्टि, a stick, ल is substituted for य......

॥ किराते चः ॥ ३३ ॥

किरातशब्दे आदेर्वर्णस्य चकारो भवति ॥ चिलादो ॥

In किरात, a barbarian, च is substituted for the initial क......

॥ कुब्जे खः ॥ ३४ ॥

कुब्जशब्दे आदेर्वर्णस्य खकारो भवति ॥ खुज्जो ॥

In कुब्ज, a hump-backed, ख is substituted for the initial letter......

॥ दोलादण्डदशनेषु डः ॥३५ ॥

एषु आदेर्वर्णस्य डकारो भवति ॥ डोला । डंडो । डसणो ॥

In the words दोला etc., ड is substituted for the initial letter......

॥ परुषपारिघपरिखासु फः ॥ ३६ ॥

एतेष्वादेर्वर्णस्य फकारो भवति ॥ फरुसो । फलिहो । फलिहा ॥

In the words परुष etc., फ is substituted for the initial letter...

॥ पनसेऽपि ॥ ३७ ॥

पनसशब्देऽपि पकारस्य फकारो भवति ॥ फणसो ॥

In the word पनस, the bread-fruit tree, फ is substituted for प......

॥ विसिन्यां भः ॥ ३८ ॥

विसिनीशब्दे आदेर्वर्णस्य भकारो भवति ॥ भिसिणी ॥ स्त्री-लिंगनिर्देशादिह न भवति ॥ विसं ॥

In the word विसिनी, भ is substituted for the initial letter ......From the express mention of the feminine विसिनी, we infer that the rule does not hold good in the neuter विसं...

॥ मन्मथे वः ॥ ३९ ॥

मन्मथशब्दे आदेर्वर्णस्य वकारो भवति ॥ वम्महो ॥

In the word मन्मथ, व is substituted for the initial letter......

॥ लाहले णः ॥ ४० ॥

लाहलशब्दे आदेर्वर्णस्य णकारो भवति ॥ णाहलो ॥

In the word लाहल,§ ण is substituted for the initial letter......

॥ षट्शावकसप्तपर्णानां छः ॥ ४१ ॥

एतेषामादेर्वर्णस्य छकारो भवति ॥ छट्ठी । छम्मुहो । छावओ । छत्तवण्णो ॥ षष्ठी । षण्मुख । शावक । सप्तपर्ण ॥

In the words षट् etc., छ is substituted for the initial letter......

॥ नो णः सर्वत्र ॥ ४२ ॥

आदेरिति निवृत्तम् । सर्वत्र नकारस्य णकारो भवति ॥ णई । कणअं । वअणं । माणुसो ॥

आदेः, initial, is no longer implied. ण is substituted for न everywhere......

§The meaning of the word लाहल is uncertain.

॥ शषोः सः ॥ ४३ ॥

सर्वत्र शकारषकारयोः सकारो भवति ॥ शस्य ॥ सद्दो । णिसा । अंकुसो ॥ षस्य ॥ संढो । वसहो । कसाअं ॥

स is everywhere substituted for श and ष......

॥ दशादिषु हः ॥ ४४ ॥

दश इत्येवमादिषु शकारस्य हकारो भवति ॥ दह । एआरह । बारह । तेरह ॥

In the words दश etc., ह is substituted for श...

॥ संज्ञायां वा ॥ ४५ ॥

संज्ञायां गम्यमानायां दशशब्दे शस्य हत्वं वा भवति ॥ दहमुहो दसमुहो । दहबलो दसबलो । दहरहो दसरहो ॥

When the word containing दश is a name, the substitution of ह for श is optional......

॥ दिवसे सस्य ॥ ४६ ॥

दिवसशब्दे सकारस्य हकारो भवति ॥ दिअहो ॥

In the word दिवस, ह is substituted for स......

॥ स्नुषायां ण्हः ॥ ४७ ॥

स्नुषाशब्दे षकारस्य ण्हकारो भवति ॥ सोण्हा ॥

In the word स्नुषा, ण्ह is substituted for ष......

॥ इति वररुचिकृते प्राकृतप्रकाशे अयुक्तवर्णविधिर्नाम द्वितीयः परिच्छेदः ॥

॥ अथ तृतीयः परिच्छेदः ॥

॥ उपरि लोपः कगडतदपषसाम् ॥ १ ॥

कादीनां स्थितानां युक्तस्योपरिस्थितानां लोपो भवति ॥ कस्य तावत् ॥ भत्तं । सित्थओ ॥ गस्य । मुद्धो । सिणिद्धो ॥ डस्य । खग्गो । सज्जो ॥

तस्य । उप्पलं । उप्पाओ ॥ दस्य । मुग्गो । मुग्गरो ॥ पस्य । सुत्तो । पज्जत्तो ॥ षस्य । गोट्ठी । णिट्ठुरो ॥ सस्य । खलिअं । णेहो ॥ भक्त । सिक्थक । मुग्ध । स्निग्ध । खड्ग । षड्ज । उत्पल । उत्पात । मुद्ग । मुद्गर । सुप्त । पर्याप्त । गोष्ठी । निष्ठुर । स्खलित । स्नेह ॥

The eight consonants क, ग, ड, त, द, प, ष and स, are elided when standing first in a conjunct; (and the remaining letter, if it is not at the beginning of the word is doubled by sūtras 50 and 51 below)......

॥ अधो मनयाम् ॥ २ ॥

मकारनकारयकाराणां युक्तस्याधःस्थितानां लोपो भवति॥ मस्य। तिग्गं । रस्सी । जुग्गं । वग्गी ॥ नस्य ॥ णग्गो ॥ यस्य ॥ सोम्मो । जोग्गो ॥

The consonants म, न and य are elided, when standing last in a conjunct, (and the remaining letter is doubled as before by sūtras 50 and 51)......

॥ सर्वत्र लवराम् ॥ ३ ॥

लकारवकाररेफाणां युक्तस्योपर्यधःस्थितानां लोपो भवति ॥ लस्य ॥ उक्का । वक्कलं । विक्कवो ॥ वस्य ॥ लोद्धओ । पिक्कं ॥ रस्य ॥ अक्को । सक्को ॥ उल्का । वल्कल । विक्लव । लुब्धक । पक्व । अर्क । शक्र ॥

The letters ल, व (or ब which is considered the same as व) and र, are always elided, whether they stand first or last in a conjunct (and the remaining letter is doubled as before)......

॥ द्रे रो वा ॥ ४ ॥

द्रशब्दे रेफस्य वा लोपो भवति॥ दोहो । द्रोहो ॥ चंदो। चंद्रो॥ रुद्दो । रुद्रो ॥

In the conjunct द्र, the elision of र is optional......

॥ सर्वज्ञतुल्येषु ञः ॥ ५ ॥

सर्वज्ञतुल्येषु ञकारस्य लोपो भवति ॥ सव्वज्जो । इंगिअज्जो ॥ जानातेर्यान्येवंरूपाणि तत्र ञलोपः ॥

In words like सर्वज्ञ, the ञ is elided... This elision takes place in all the words which are similarly derived from the root ज्ञा to know......

॥ श्मश्रुश्मशानयोरादेः ॥ ६ ॥

श्मश्रुश्मशानयोरादेर्वर्णस्य लोपो भवति ॥ मस्सू । मसाणं ॥

The first letter of श्मश्रु and श्मशान is elided......

॥ मध्याह्ने हस्य ॥ ७ ॥

मध्याह्नशब्दे हकारस्य लोपो भवति ॥ मज्झण्णो ॥

In the word मध्याह्न, ह is elided......

॥ ह्नह्लह्मेषु नलमां स्थितिरूर्ध्वम् ॥ ८ ॥

ह्न ह्ल ह्म इत्येतेष्वधःस्थितानां नकारलकारमकाराणां स्थितिरूर्ध्वमुपरिष्टाद्भवति ॥ ह्नस्य । पुव्वण्हो । अवरण्हो ॥ ह्लस्य । कल्हारं । अल्हादो ॥ ह्मस्य । बम्हणो ॥

In the conjunct ह्न, ह्ल, ह्म, the letters न, ल and म are respectively written before ह......

॥ युक्तस्य ॥ ९ ॥

अधिकारोऽयम् । आ परिच्छेदसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामो युक्तस्येत्येवं वेदितव्यम् ॥ वक्ष्यति । अस्थिनि अट्ठी । युक्तग्रहणं हलोन्त्यस्य मा भूत् ॥

This is an अधिकारसूत्र, and is implied in the succeeding sūtras to the end of the section. Our rules are henceforth to be understood as supplying a substitute for a conjunct. अट्ठि for अस्थि (by sūtra 11) will serve as an instance. The use of the word युक्त, conjunct, shows that these substitu-

tions are not intended to apply to final letters, since the second member of a final conjunct is dropped by the rule of पाणिनि, viii 2. 23.

॥ ष्टस्य ठः ॥ १० ॥

ष्ट इत्येतस्य युक्तस्य ठकारो भवति ॥ लट्ठी । दिट्ठी ॥

ठ is substituted for the conjunct ष्ट......

॥ अस्थिनि ॥ ११ ॥

अस्थिशब्दे युक्तस्य ठकारो भवति ॥ अट्ठी ॥

In the word अस्थि, ठ is substituted for the conjunct...

॥ स्तस्य थः ॥ १२ ॥

स्तशब्दस्य थकारो भवति । उपरिलोपापवादः ॥ हत्थो । समत्थो ॥ थुई । थवओ । कोत्थुहो ॥ हस्त । समस्त । स्तुति । स्तवक । कौस्तुभ ।

थ is substituted for स्त. This sūtra revokes sūtra 1 above, which would enjoin the elision of स as being the first member of the conjunct स्त......

॥ न स्तम्बे ॥ १३ ॥

स्तम्बशब्दे स्तकारस्य थकारो न भवति ॥ तंबो ॥

In the word स्तम्ब, थ is not substituted for स्त......

॥ स्तम्भे खः ॥ १४ ॥

स्तम्भशब्दे स्तकारस्य खकारो भवति ॥ खंभो ॥

In the word स्तम्भ, ख is substituted for स्त......

॥ स्थाणावहरे ॥ १५ ॥

स्थाणुशब्दे युक्तस्य खकारो भवति । अहरे हराभिधेये न भवति ॥ खाणू ॥ अहर इति किम् ॥ थाणू । हरो ॥

In the word स्थाणु, post or firm, ख is substituted for the conjunct except when it signifies god शिव...Why do we make this exception ? When it signifies शिव, it becomes थाणु by sūtra 1......

॥ स्फोटके ॥ १६ ॥

स्फोटकशब्दे युक्तस्य खकारो भवति ॥ खोडओ ॥

In the word स्फोटक, ख is substituted for the conjunct...

॥ र्यशय्याभिमन्युषु जः ॥ १७ ॥

र्य इत्यस्य शय्याभिमन्युशब्दयोश्च युक्तस्य जकारो भवति ॥ कज्जं । सेज्जा । अहिमज्जू ॥

ज is substituted for the conjunct र्य, and also for the conjunct in the two words शय्या and अभिमन्यु......

॥ तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः ॥ १८ ॥

एतेषु शब्देषु र्यस्य रेफो भवति ॥ तूरं । धीरं । सुंदेरं । अच्छेरं । पेरंतं ॥

In the words तूर्य etc., र is substituted for the conjunct र्य......

॥ सूर्ये वा ॥ १९ ॥

सूर्यशब्दे र्यकारस्य रेफादेशो भवति वा ॥ सूरो । सुज्जो ॥

In the word सूर्य, र is optionally substituted for र्य...

॥ चौर्यसमेषु रिअं ॥ २० ॥

चौर्यसमेषु शब्देषु र्यस्य रिअं इत्यादेशो भवति ॥ चोरिअं । सोरिअं । वीरिअं ॥ चौर्य। शौर्य । वीर्य ॥ समग्रहणादाकृतिगणोऽयम् ॥

In words like चौर्य, रिअ is substituted for र्य ...By the use of the word सम in the sūtra we understand that this is a class which can only be determined by usage......

॥ पर्यस्तपर्याणसौकुमार्येषु लः ॥ २१ ॥

एषु शब्देषु र्यस्य लकारो भवति ॥ पल्लत्थं । पल्लाणं । सोअमल्लं ।

In the words पर्यस्त etc., ल is substituted for र्य ......

॥ र्तस्य टः ॥ २२ ॥

र्त इत्येतस्य टकारो भवति ॥ केवट्टओ । णट्टओ । णट्टइ ॥

ट is substituted for र्त......

॥ पत्तने ॥ २३ ॥

पत्तनशब्दे युक्तस्य टकारो भवति ॥ पट्टणं ॥

In the word पत्तन, a town, ट is substituted for the conjunct......

॥ न धूर्तादिषु ॥ २४ ॥

धूर्त इत्येवमादिषु र्त इत्येतस्य टकारो न भवति ॥ धुत्तो । कित्ती । वत्तमाणं । वत्ता । आवत्तो । संवत्तओ । णिवत्तओ । वत्तिआ । अत्तो । कत्तरी । मुत्ती ॥ धूर्त । कीर्ति । वर्तमान । वार्ता । आवर्त । संवर्तक । निवर्तक । वर्तिका । आर्त । कर्तरी । मूर्ति ॥

ट is not substituted for र्त in the class धूर्त etc.......

॥ गर्ते डः ॥ २५ ॥

गर्तशब्दे र्तस्य डकारो भवति ॥ गड्डो ॥

In the word गर्त, ड is substituted for र्त ......

॥ गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य ॥ २६ ॥

एतेषु र्दस्य डो भवति ॥ गड्डहो । संमड्डो । विअड्डी । विछड्डी ॥

In the words गर्दभ etc., ड is substituted for र्द ......

॥ त्यथ्यद्यां चछजाः ॥ २७ ॥

त्य थ्य द्य इत्येतेषां च छ ज इत्येते यथासंख्यं भवन्ति ॥ त्यस्य ॥ णिच्चं । पच्चच्छं ॥ थ्यस्य ॥ रच्छा । मिच्छा । पच्छं ॥ द्यस्य ॥ विज्जा । वेज्ज ॥ नित्य । प्रत्यक्ष । रथ्या । मिथ्या । पथ्य । विद्या । वैद्य ॥

च, छ, ज, are respectively substituted for the conjunct, त्य, थ्य, द्य......

॥ ध्यह्योर्झः ॥ २८ ॥

ध्य ह्य इत्येतयोर्झकारो भवति ॥ ध्यस्य ॥ मज्झं । अज्झाओ ॥ ह्यस्य ॥ वज्झओ । गुज्झओ ॥ मध्य । अध्याय । बाह्यक । गुह्यक ॥

झ is substituted for the conjuncts ध्य and ह्य......

॥ ष्कस्कक्षां खः ॥ २९ ॥

ष्कस्कक्षां खकारो भवति ॥ ष्कस्य । मुक्खं । पोक्खरो ॥ स्कस्य ॥ खंदो । खंधो ॥ क्षस्य ॥ खदो । जक्खो ॥

ख is substituted for the conjuncts ष्क, स्क, and क्ष......

॥ अक्ष्यादिषु छः ॥ ३० ॥

अक्षि इत्येवमादिषु क्षकारस्य छकारो भवति ॥ अच्छी । लच्छी । छुण्णो । छीरं । छुद्धो । उक्खित्तो । सरिच्छं । उच्छू । उच्छा । छारं । रिच्छो । मच्छिआ । छुअं । छुरं । छेत्तं । वच्छो । दच्छो । कुच्छी ॥

अक्षि । लक्ष्मी । क्षुण्ण । क्षीर । क्षुब्ध । उत्क्षिप्त । सदृक्ष । इक्षु । उक्षन् । क्षार । ऋक्ष । मक्षिका । क्षुत । क्षुर । क्षेत्र । वक्षस् । दक्ष । कुक्षि । इत्येवमादयः ॥

In words अक्षि etc., छ is substituted for क्ष......

॥ क्षमावृक्षक्षणेषु वा ॥ ३१ ॥

एतेषु क्षकारस्य छकारो भवति वा । छमा । खमा ॥ वच्छो । रुक्खो ॥ छणं । खणं ॥ वृक्षशब्दे ऋकारस्याकारे कृते क्षणशब्दे चोत्सवाभिधायिनि छत्वमिष्यते ॥

In the words क्षमा, वृक्ष and क्षण, छ is optionally substituted for क्ष............It should be noted that छ is used in वृक्ष when अ is substituted for ऋ, and in क्षण when it signifies feast, उत्सव......

॥ ष्मपक्ष्मविस्मयेषु म्हः ॥ ३२ ॥

ष्म इत्येतस्य पक्ष्मविस्मयशब्दयोश्च युक्तस्य म्हकारो भवति ॥ ष्मस्य ॥ गिम्हो । उम्हा । पम्हो । विम्हओ ॥ ग्रीष्म । उष्मन् । पक्ष्मन् । विस्मय ॥

म्ह is substituted for ष्म and also for the conjunct in पक्ष्म and विस्मय......

॥ ह्नस्नष्णक्ष्णश्नां ण्हः ॥ ३३ ॥

ह्नादीनां ण्ह इत्ययमादेशो भवति ॥ ह्नस्य । वण्ही । जण्हू ॥ स्नस्य ॥ ण्हाणं । पण्हुदं ॥ ष्णस्य ॥ विण्हू । कण्हो ॥ क्ष्णस्य ॥ सण्हं । तिण्हं ॥ श्नस्य ॥ पण्हो । सिण्हो ॥ वह्नि । जह्नु । स्नान । प्रस्नुत । विष्णु । कृष्ण । श्लक्ष्ण । तीक्ष्ण । प्रश्न । शिश्न ॥

ण्ह is substituted for ह्न, स्न, ष्ण, क्ष्ण and श्न......

॥ चिह्ने न्धः ॥ ३४ ॥

चिह्नशब्दे युक्तस्य न्ध इत्ययमादेशो भवति ॥ चिंधं ॥

In the word चिह्न, न्ध is substituted for the conjunct.

॥ ष्पस्य फः ॥ ३५ ॥

ष्प इत्येतस्य फ इत्ययमादेशो भवति ॥ पुप्फं । सप्फं । णिप्फाओ ॥ पुष्प । शष्प । निष्पाव ॥

फ is substituted for ष्प......

॥ स्पस्य सर्वत्र स्थितस्य ॥ ३६ ॥

स्प इत्येतस्य सर्वत्र स्थितस्य फ इत्ययमादेशो भवति ॥ फंसो । फंदणं ॥ स्पर्श । स्पन्दन ॥

फ is substituted for स्प wherever it is found (*i. e.*, in the beginning or end of a word)...

॥ सि च ॥ ३७ ॥

स्पस्य कचित् सि इत्ययमादेशो भवति ॥ पाडिसिद्धी ॥ प्रतिस्पर्द्धिन् ॥

सि is also sometimes substituted for स्प......

॥ वाष्पेऽश्रुणि हः ॥ ३८ ॥

वाष्पशब्दे ष्प इत्येतस्य हकारो भवति अश्रुणि वाच्ये ॥ वाहो ॥ अश्रुणि किं ॥ वप्फो ॥ वाष्प उष्मन् ॥

ह is substituted for ष्प in the word वाष्प when it signifies 'a tear'......Why do we specify this signification ? When it signifies 'hot vapour' we must use वप्फो (by sūtra 35 above).

॥ कार्षापणे ॥ ३९ ॥

कार्षापणशब्दे युक्तस्य हकारो भवति ॥ काहावणो ॥

ह is substituted for the conjunct in the word कार्षापण...

॥ श्चत्सप्सां छः ॥ ४० ॥

एतेषां छकारो भवति ॥ श्चस्य । पच्छिमं । अच्छेरं ॥ त्सस्य । वच्छो । वच्छरो ॥ प्सस्य । लिच्छा । जुगुच्छा ॥ पश्चिम । आश्चर्य । वत्स । वत्सर । लिप्सा । जुगुप्सा ॥

छ is substituted for the conjuncts श्च, त्स and प्स...

॥ वृश्चिके ञ्छः ॥ ४१ ॥

वृश्चिकशब्दे श्चकारस्य ञ्छ इत्ययमादेशो भवति ॥ विञ्छुओ ।

In the word वृश्चिक, ञ्छ is substituted for श्च......

॥ नोत्सुकोत्सवयोः ॥ ४२ ॥

उत्सुक उत्सव इत्येतयोः त्स इत्येतस्य छकारो न भवति ॥ श्चत्सप्सां छ इति प्राप्ते प्रतिषिध्यते ॥ उस्सुओ । उस्सवो ॥

In the words उत्सुक and उत्सव the substitution of छ for त्स (enjoined by sūtra 40) is prohibited... We have therefore उस्सुओ and उस्सवो (by iii. 1, 50).

॥ न्मो मः ॥ ४३ ॥

न्म इत्येतस्य म इत्ययमादेशो भवति। अधोलोपे प्राप्ते। जम्मो। वम्महो ॥ जन्म। मन्मथ ॥

म is substituted for न्म, although म is properly elided when it is the second member of a conjunct......

॥ म्नज्ञपञ्चाशत्पञ्चदशेषु णः ॥ ४४ ॥

म्न ज्ञ इत्येतयोः पञ्चाशत् पञ्चदश शब्दयोश्च युक्तस्य णकारो भवति ॥ म्नस्य ॥ पज्जुण्णो ॥ ज्ञस्य ॥ जण्णो। विण्णाणं ॥ पण्णासा। पण्णरहो ॥ प्रद्युम्न। यज्ञ। विज्ञान। पञ्चाशत्। पञ्चदश ॥

ण is substituted for म्न, ज्ञ, and for the conjuncts in the words पञ्चाशत् and पञ्चदश......

॥ तालवृन्ते ण्टः ॥ ४५ ॥

तालवृन्ते युक्तस्य ण्ट इत्ययमादेशो भवति ॥ तालवेण्टअं ॥

In the word तालवृन्त, ण्ट is substituted for the conjunct...

॥ भिन्दिपाले ण्डः ॥ ४६ ॥

भिन्दिपालशब्दे युक्तस्य ण्ड इत्ययमादेशो भवति ॥ भिण्डिवालो ॥

In the word भिन्दिपाल, a dart, ण्ड is substituted for the conjunct......

॥ विह्वले भहौ वा ॥ ४७ ॥

विह्वलशब्दे युक्तस्य भकारहकारौ भवतो वा ॥ वेब्भलो। विहलो ॥

In the word विह्वल, भ and ह are optionally substituted for the conjunct......

॥ आत्मनि पः ॥ ४८ ॥

आत्मशब्दे युक्तस्य पकारो भवति ॥ अप्पा ॥

In the word आत्मन्, प is substituted for the conjunct...

॥ क्मस्य ॥ ४९ ॥

क्म इत्येतस्य पकारो भवति ॥ रुप्पं । रुप्पिणी ॥ योगविभागो नित्यार्थः ॥

प is substituted for the conjunct **क्म** ..The commentator remarks that this and the preceding sūtra (which might otherwise have been combined into one sūtra) are separated, because the latter of the two (*i. e.*, sūtra 49) is absolute, while the former (sūtra 48) is only partially applicable, as आत्मन् admits of another form (see v. 45) besides अप्पा.

॥ शेषादेशयोर्द्वित्वमनादौ ॥ ५० ॥

युक्तस्य यौ शेषादेशभूतौ तयोरनादौ वर्तमानयोर्द्वित्वं भवति ॥

शेषस्य तावत् ॥ भुत्तं । मग्गो ॥ आदेशस्य ॥ लट्ठी । दिट्ठी । हत्थो ॥ अनादाविति किम् ॥ खलिअं । खंभो । थवओ ॥ भुक्त । मार्ग । यष्टि । दृष्टि । हस्त । स्खलित । स्तम्भ । स्तवक ॥

Wherever after performing an elision (शेष) or substitution (आदेश) enjoined by a rule, a single consonant comes to represent a conjunct, this letter is always doubled, except at the beginning of a word.........Why do we except those which are at the beginning of a word ? Compare the cases of खलिअ for स्खलित etc.

॥ वर्गेषु युजः पूर्वः ॥ ५१ ॥

युक्तस्य यौ शेषादेशावनादिभूतौ तयोर्द्वित्वेऽपि विहिते अध ऊर्ध्वेन यो वर्गेषु वर्णो द्वितीयश्चतुर्थो वा विहितस्तस्य पूर्वः प्रथमस्तृतीयो वा भवति ॥ वर्गेषु युग्मस्य द्वितीयस्य प्रथमश्चतुर्थस्य तृतीयो द्वित्वेन विधीयते । अयुग्मयोः प्रथमतृतीयपञ्चमरूपयोः शेषादेशयोस्तु तावेव भवतः ॥

शेषस्य ॥ वक्खाणं । अग्घो । मुच्छा । णिज्झरो । लुद्धो । णिब्भरो ॥ आदेशस्य ॥ दिट्ठी । लट्ठी । वच्छो । विप्फरिसो । णित्थारो । जक्खो । लच्छी । अट्ठी । पुप्फं ॥

व्याख्यान । अर्घ । मूर्छा । निर्झर । लुब्ध । निर्भर । दृष्टि । यष्टि । वक्षस् । विस्पर्श । निस्तार । यक्ष । लक्ष्मी । अस्थि । पुष्प ॥

When the doubling enjoined by the previous sūtra takes place, whether in regard to the first or the second member of the conjunct, wherever the single representative is an aspirate (*i. e.*, the second or fourth letter of its class), it is to be doubled by prefixing its own non-aspirate; in the case of the other letters, of course they themselves are their own duplicates……

॥ नीडादिषु ॥ ५२ ॥

नीड इत्येवमादिषु अनादौ वर्तमानस्य द्वित्वं भवति ॥ णेड्डं ॥ एन्नीडापीडेत्यादिना णत्वम् ॥ सोत्तं । पेम्मं । वाहित्तं । उज्जुओ । जण्णओ । जोव्वणं ॥ नीड । स्रोत । प्रेमन् । व्याहृत । ऋजु । जनक । यौवन ॥

In the words नीड etc., the medial letter is doubled, although it is not a conjunct……Here ए is substituted for इ by the sūtra i. 19……

॥ आम्रताम्रयोर्वः ॥ ५३ ॥

आम्र ताम्र इत्येतयोर्द्वित्वेन वकारो भवति ॥ अंवं । तंवं ॥

In the words आम्र and ताम्र, व is employed in the doubling (enjoined by sūtra 50 above)...

॥ न रहोः ॥ ५४ ॥

रेफहकारयोर्द्वित्वं न भवति ॥ धीरं । तूरं । जीहा । वाहो ॥ धैर्य । तूर्य । जिह्वा । वाष्प ॥

र and ह are never doubled……

॥ आङो ज्ञस्य ॥ ५५ ॥

आङ उत्तरस्य ज्ञ इत्येतस्यादेशस्य द्वित्वं न भवति ॥ आणा । आणत्ती ॥ आज्ञा । आज्ञप्ति ॥ आङ इति किम् ॥ सण्णा ॥ संज्ञा ॥

When ज्ञ is preceded by the preposition आ, its substitute (*i. e.* ण) is not doubled......Why do you say 'when preceded by आ'? Because we want the doubling in words like सण्णा for संज्ञा.

॥ न बिंदुपरे ॥ ५६ ॥

अनुस्वारपरे द्वित्वं न भवति ॥ संकंतो । संझा ॥ संक्रान्त । संध्या ॥

A letter, which immediately follows अनुस्वार, is not doubled......

॥ समासे वा ॥ ५७ ॥

॥ समासे शेषादेशयोर्वा द्वित्वं भवति ॥ णइग्गामो । णईगामो । कुसुमप्पअरो । कुसुमपअरो । देवत्थुई । देवथुई । आणालक्खंभो । आणालखंभो ॥ नदीग्राम । कुसुमप्रकर । देवस्तुति । आलानस्तम्भ ॥

In a compound word, the doubling is optional, whether in the case of elision or substitution...

॥ सेवादिषु च ॥ ५८ ॥

सेवा इत्येवमादिषु चानादौ वा द्वित्वं भवति ॥ सेव्वा सेवा । एक्कं एअं । णक्खो णहो । देव्वं दइवं । असिव्वं असिवं । तेलोक्कं तेलोअं । णिहित्तो णिहिओ । तुण्हिक्को तुण्हिओ । कण्णिआरो कणिआरो । दिग्घं दीहं । रत्ती राई । दुक्खिओ दुहिओ । अस्सो असो । इस्सरो ईसरो । विस्सासो वीसासो । णिस्सासो णीसासो । रस्सी रसी । मित्तो मिओ । पुस्सो पुसो ॥ सेवा । एक । नख । दैव । अशिव ।

त्रैलोक्य । निहित । तूष्णीक । कर्णिकार । दीर्घ । रात्रि । दुःखित । अश्व । ईश्वर । विश्वास । निश्वास । रश्मि । मित्र । पुष्य ॥

उभयत्र विभाषेयं सेवादीनामप्राप्ते दीर्घादीनां च प्राप्ते ॥

In the words सेवा etc., the medial letter is optionally doubled...... The alternative can be considered in two ways; in words like सेवा, there would have been no occasion for the doubling except for this rule; in words like दीर्घ, the doubling is already enjoined by other rules (*e. g.*, iii. 3 and iii. 50), and therefore the option granted by this is required to dispense with their operation.

॥ विप्रकर्षः ॥ ५९ ॥

अधिकारोऽयम् । आ परिच्छेदसमाप्तेः। युक्तस्य विप्रकर्षो भवति ॥

This, being an अधिकारसूत्र, will be implied in the following sūtras to the end of the section. (युक्तस्य still continues to be implied from sūtra 9. We are, therefore, to understand that the subject of the following sūtras to the end of the section will be) the separation (विप्रकर्ष) of conjuncts.

॥ क्लिष्टश्लिष्टरत्नक्रियाशाङ्गेषु तत्स्वरवत्पूर्वस्य ॥ ६० ॥

क्लिष्टादिषु युक्तस्य विप्रकर्षो भवति। विप्रकृष्टस्य च यः पूर्वो वर्णो निरर्थस्तस्य तत्स्वरता भवति । तेनैव पूर्वेण स्वरेण पूर्वो वर्णः सार्थो भवतीत्यर्थः ॥ किलिट्ठं । सिलिट्ठं । रअणं । किरिआ । सारंगो ॥

In the words क्लिष्ट etc., the conjunct consonants are separated; and the first consonant, which has no vowel of its own, undergoes vocalisation, and becomes sounded with the original vowel......

॥ कृष्णे वा ॥ ६१ ॥

कृष्णशब्दे युक्तस्य वा विप्रकर्षो भवति । पूर्वस्य च तत्स्वरता ॥ व्यवस्थितविभाषेयम् । तेन वर्णे नित्यं विप्रकर्षः । विष्णौ तु न भवत्येव ॥ कसणो ॥ कण्हो ॥

In the word कृष्ण, the separation of the conjunct ष्ण is optional ; in the case of the separation the vowel must be supplied as before; here, however, the option is definitely restricted : The separation is obligatory when कृष्ण means black colour : as, कसण ; but it is forbidden when it means विष्णु; as कण्हो......

॥ इः श्रीह्रीक्रीतक्लान्तक्लेशम्लानस्वप्नस्पर्शहर्षार्हगर्हेषु ॥ ६२ ॥

एषु युक्तस्य विप्रकर्षो भवति । पूर्वस्य इकारः । तत्स्वरता च भवति ॥ सिरी । हिरी । किरीतो । किलंतो । किलेसो । मिलाणं । सिविणो । फरिसो । हरिसो । अरिहो । गरिहो ॥ श्री । ह्री । क्रीत । क्लान्त । क्लेश । म्लान । स्वप्न । स्पर्श । हर्ष । अर्ह । गर्ह ॥

In the words श्री etc., the conjuncts are separated and the first consonant adds इ and not the original vowel......

॥ अः क्ष्माश्लाघयोः ॥ ६३ ॥

क्ष्मा श्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति। पूर्वस्य अकारस्तत्स्वरता च भवति ॥ खमा । सलाहा ॥

In the words क्ष्मा and श्लाघा the conjunct is divided and the first consonant is sounded with अ......

॥ स्नेहे वा ॥ ६४ ॥

स्नेहशब्दे युक्तस्य विप्रकर्षो वा भवति । पूर्वस्य च अकारस्तत्स्वरता च भवति ॥ सणेहो । णेहो ॥

In the word स्नेह the division of the conjunct is optional, but when it does take place, the first consonant is sounded with अ......

॥ उः पद्मतन्वीसमेषु ॥ ६५ ॥

पद्मशब्दे तन्वी इत्येवंसमेषु च युक्तस्य विप्रकर्षो भवति । पूर्वस्य च उकारस्तत्स्वरता च भवति ॥ पउमं । तणुई । लहुई ॥

In पद्म and words like तन्वी (such as लघ्वी etc.) the conjunct is divided, and the first consonant is sounded with उ......

॥ ज्यायामीत् ॥ ६६ ॥

ज्याशब्दे युक्तस्य विप्रकर्षो भवति । पूर्वस्य च ईकारस्तत्स्वरता च ॥ जीआ ॥

In the word ज्या, bow-string, the conjunct is divided and the first consonant is sounded with ई.

॥ इति वररुचिकृते प्राकृतप्रकाशे युक्तवर्णविधिर्नाम तृतीयः परिच्छेदः ॥

॥ अथ चतुर्थः परिच्छेदः ॥

॥ संधावचामज्लोपविशेषा बहुलम् ॥ १ ॥

अचामिति प्रत्याहारग्रहणम् । अजिति च । संधौ वर्तमानानामचां स्थाने अज्विशेषा लोपविशेषाश्च बहुलं भवन्ति ॥

अज्विशेषास्तावत् । जउणअडं जउणाअडं । णइसोत्तो णईसोत्तो। वहुमुहं वहूमुहं । कण्णउरं कण्णऊरं । सिरोवेअणा सिरवेअणा । पीआपीअं पिआपिअं । सीआसीअं सिआसिअं । सवोमुओ सवोमूओ । सरोरुहं सररुहं ॥

लोपविशेषाः ॥ राउलं राअउलं । तुहद्धं तुहअद्धं । महद्धं महअद्धं । वावडणं वाअवडणं । कुंभारो कुंभआरो । पवणुद्धअं ॥

The expressions अचाम् and अच् refer to the प्रत्याहार अच्, vowels. When vowels are in संधि, are in a state of intermediate conjunctions, various kinds of vowels and elisions arise......

संयोगपरे सर्वत्र पूर्वस्याचो लोपः ।

क्वचिन्नित्यं क्वचिदन्यदेव बहुलग्रहणात् । तेनान्यदपि लाक्षणिककार्यं भवति ॥

When a conjunct consonant follows, it is always the first of the two meeting vowels, which is elided (of course when there is any elision at all). From the use of बहुलम्, variously, in the sūtra, we conclude that these changes are in some cases absolute, in others they admit of different forms ; hence when other forms are met with, they are still to be considered as here provided for in Grammar.

॥ उदुम्बरे दोर्लोपः ॥ २ ॥

उदुम्बरशब्दे दु इत्येतस्य लोपो भवति ॥ उंबरं ॥
In the word उदुम्बर, दु is elided......

॥ कालायसे यस्य वा ॥ ३ ॥

कालायसशब्दे यस्य वा लोपो भवति ॥ कालासं कालाअसं ॥
In the word कालायस, य is optionally elided......

॥ भाजने जस्य ॥ ४ ॥

भाजनशब्दे जकारस्य लोपो वा भवति ॥ भाणं भाअणं ॥
In भाजन, ज is optionally elided......

॥ यावदादिषु वस्य ॥ ५ ॥

यावदित्येवमादिषु वकारस्य वा लोपो भवति ॥ जा जाव । ता ताव । पाराओ पारावओ । अणुत्तंत अणुवत्तंत । जीअं जीविअं । एअं एव्वं । एअ एव्व । कुअलअं कुवलअं ॥ यावन् । तावन् । पारावत । अनुवर्तमान । जीवित । एवं । एव । कुवलय । इत्येवमादयः ॥
In the words यावत् etc., व is optionally elided......

॥ अन्त्यस्य हलः ॥ ६ ॥

वेति निवृत्तम् । शव्दानां योऽन्त्यो हल् तस्य लोपो भवति ॥ जसो । णहं । सरो । कम्मो । जाव । ताव ॥ यशस् । नभस् । सरस् । कर्मन् । यावत् । तावत् ॥

The word वा implied in the preceding sūtras is no longer implied. A final consonant is always elided......

॥ स्त्रियामात् ॥ ७ ॥

स्त्रियां वर्तमानस्यान्त्यहल आकारो भवति ॥ सरिआ । पडिवआ । वाआ । सरित् । प्रतिपद् । वाच् ॥

आ is substituted for the final consonant of a feminine word......

॥ रो रा ॥ ८ ॥

स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति ॥ धुरा । गिरा ॥

रा is substituted for the final र in a feminine word......

॥ न विद्युति ॥ ९ ॥

विद्युच्छव्दे आकारो न भवति ॥ विज्जू ॥

आ is not substituted for the final consonant of the word विद्युत्......

॥ शरदो दः ॥ १० ॥

शरच्छव्दस्यान्त्यहलो दो भवति ॥ सरदो ॥

द is substituted for the final consonant of the word शरद् ......

॥ दिक्प्रावृषोः सः ॥ ११ ॥

दिक्शब्दस्यान्त्यहलः प्रावृट्शब्दस्यापि सकारो भवति ॥ दिसा। पाउसो ॥

स is substituted for the final consonant of the words दिश् and प्रावृष्......

॥ मो विन्दुः ॥ १२ ॥

